गुडस्य तु तुला ताभ्यां कषायं विपचेद् भिषक् ।
भल्लातकत्वक्‌स्वरसाभ्यां मल्लानं तत्र दापयेत् ।
त्रिकटुत्रिफलामुस्तसैन्धवानां पलं पलम् ।
दीप्यकस्य पलञ्चैव चातुर्ज्जातं पलांशिकम् ।
संचूर्ण्य प्रक्षिपेत्तत्र कन्दकञ्च चतुःपलम् ।
स्निग्धभाण्डे विनिक्षिप्य स्थापयेत् कुशलो भिषक् ।
महाभल्लातको ह्येष महादेवेन निर्म्मितः ।
जगतस्तु हितार्थाय जयेच्छीघ्रं न संशयः ।
त्रिंशन्मौडम्बरं दद्रुमृष्यजिह्वं सकाकणम् ।
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं मण्डलं तथा ।
कण्डूं कपालं कच्छूञ्च पामानं सविभादिकम् ।
वातरक्तमुदावर्त्तं पाण्डुरोगं व्रणक्रिमीन् ।
अर्शांसि षट्‌प्रकाराणि कासं श्वासं भगन्दरम् ।
सदाभ्यासेन पलितमामवातं सुदुस्तरम् ।
अनुपाने प्रयोक्तव्यं छिन्नाक्वाथं पयोऽथवा ।
भोजने च सदा भोज्यमुष्णयान्नं विशेषतः" ।
इति महाभल्लातकगुडः । ६९ ।
"ऊताम्रमुखसंशुद्धं पलमेकं रसस्य वै ।
पलं लौहस्य ताम्रस्य पलं भल्लातकस्य च ।
गन्धकस्य पलञ्चैकमभ्रकस्य च गुग्गुलोः ।
हरीतकीविभीतक्योश्चूर्णं कर्षद्वयं द्वयोः ।
अष्टमाषाधिकं तत्र धान्याः पाचितकानि षट् ।
घृतं द्वादशगुणं लोहात् द्वात्रिंशत्त्रिफलाजलम् ।
एकं कृत्वा पचेत् पात्रे लौहे च विधिपूर्ब्बकम् ।
पाकमेतस्य जानीयात् कुशलो लोहपाकवित् ।
विशुद्धः प्रातरुत्थाय गुरुदेवद्विजार्च्चकः ।
रक्तिकादिक्रमेणैव घृतभ्रामरमर्द्दितम् ।
लौहे लौहस्य दण्डेन कुर्य्यादेतद्रसायनम् ।
अनुपानञ्च कुर्व्वीत नारिकेलोदकं पयः ।
सर्व्वकुष्ठहरं श्रेष्ठं वलीपलितनाशनम् ।
पाण्डुमेहामवातघ्नं वातरक्तक्षयापहम् ।
क्रिमिशोथाश्मरीशूलदुर्नामवातरोगनुत् ।
क्षयं हन्ति महाश्वासमत्यर्थं शुक्रवर्द्धनम् ।
अग्निसन्दीपनं वृष्यं कान्त्यायुर्बलवृद्धिकृत् ।
विवर्ज्ज्य शाकाम्लमपि स्त्रियञ्च
सेव्यो रसो जाङ्गलजाविकानाम् ।
शाल्योदनं षष्टिकमाज्यमुद्ग-
क्षौद्रं गुडः क्षीरमिह क्रियायाम् ।
शालिञ्च गुर्व्वादिद्रुतारस-
शिलाजतुक्षौद्रयुतं पयश्च ।
सर्पिर्युतं भक्षयतो विहङ्गान्
प्रपूर्य्यते दुर्ब्बलदेहधातुः ।
शस्यस्य पक्षस्य सिते तु पक्षे
चिपकराजेन यथा शशाङ्कः" ।
पाकलक्षणं यथा,—
"वस्त्रे निष्पीडितं सम्यक् स्थूलतन्तौ घने दृढ़े ।
अणुर्न्न जायते यत्र न निःसरति सन्धिभिः ।
न च शब्दायते वह्नौ तदा सिद्धिं विनिर्द्दिशेत्" ।
इति अमृताङ्कुरलौहम् । ७० ।
"गन्धकेन हतं ताम्रं दशभागं समुद्धरेत् ।
उभयं पञ्चभागं स्यादभ्रतश्च द्विभागिकम् ।
दातव्यं कुष्ठिने सम्यगनुपानस्य योगतः ।
गलिते स्फुटिते चैव विपुले मण्डले तथा ।
विचर्चिकादद्रुपामावल्यकुष्ठप्रशान्तये" ।
इति उदयभास्करः । ७१ ।
"तालकं वंशपत्राख्यं कुष्माण्डसलिले क्षिपेत् ।
सप्तधा वा त्रिधा वापि दध्याम्लेन तथैव च ।
शोधयित्वा पुनः शुष्कं चूर्णयेत् तण्डुलाकृतिः ।
ततः शरावके यन्त्रे स्थापयेत् कुशलो भिषक् ।
वदरीपत्रवोल्येन लेपनं कारयेत् ततः ।
अहर्यामममधःपार्श्वं तावज्ज्वाला प्रदीयते ।
स्वाङ्गशीतं समुद्धृत्य माणिक्याभो भवेद्रसः ।
घृतक्षौद्रेण संमर्द्य खादयेद्रक्तिकाद्वयम् ।
संपूज्य देवदेवेशं कुष्ठरोगाद्विमुच्यते ।
स्फुटितं गलितं कुष्ठं वातरक्तं भगन्दरम् ।
नाड़ीव्रणं व्रणं दुष्टमुपदंशं विचर्च्चिकाम् । [यान् ।
नासास्यसम्भवान् रोगान् हतान् हन्यात् सदारु-
पुण्डरीकञ्च चर्म्माख्यं विस्फोटं मण्डलं तथा" ।
इति रसमाणिक्यम् । ७२ ।
"कुष्माण्डत्रिफलातैलकन्याकाञ्जिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ।
अजाक्षीरेण निम्बूककन्यातोयैर्द्दिनत्रयम् ।
प्रत्येकं भावयेत् शुष्कं चक्रिकाकारतां गतम् ।
विपचेत् हण्डिकामध्ये पलाशक्षारमध्यगम् ।
यामान् द्वादश शीतेऽस्मिन् प्रयोज्यं रक्तिकाद्वयम् ।
हन्त्यष्टादशकुष्ठानि रोमविध्वंसनं तथा ।
विविधं वातरक्तञ्च नाड़ीदुष्टव्रणानि च" ।
इति तालकेश्वरः । ७३ ।
"दद्रुघ्नवाकुञ्चिरसं दत्त्वा तालं सुचूर्णितम् ।
पुनः पुनश्च संमर्द्य शुष्कं कृत्वा पुटे दहेत्" ।
वाकुञ्चिरसं शरपुङ्खपत्ररसम् ।
दृढ़स्थाल्यां घृतं क्षारं पालाशपात्रपर्य्यधः ।
ततो ज्वाला प्रदातव्या दिनरात्रे मृतं भवेत् ।
शुक्लवर्णो यदा च स्यादग्नौ दत्ते न धूमकम् ।
तदा ज्ञातं मृतं तालं सर्व्वकुष्ठविनाशनम् ।
गलत् कुष्ठं वातरक्तं ताम्रवर्णञ्च मण्डलम् ।
शीतपित्तमहादद्रुकुष्ठकण्डूरविनाशनम् ।
पथ्यं मसूरचणकं मुद्गसूपं यथेच्छया" ।
इति तालकेश्वरः । ७४ । अतिवृष्टफलोऽयम् ।
"संमर्द्य तालकं शुष्कं वंशपत्राख्यमुत्तकैः ।
कुष्माण्डनीरे सम्भाव्य त्रिदिनं शोधयेत् पुनः ।
घृतकन्याद्रवैर्भूयो भावयेच्च दिनत्रयम् ।
संमर्द्य काञ्जिकेनैव दध्याम्लेन विमर्द्दयेत् ।
संमर्द्य चूर्णसलिले रसे पौनर्नवे पुनः ।
त्रिदिनं मर्द्दयित्वा तु कारयेत् खटिकाकृतिम् ।
स्थाल्यां दृढ़तरायान्तु पलाशक्षारसञ्चयम् ।
उपर्य्यधस्तालकस्य क्षारं दत्त्वा शरावकैः ।
पिधाय लेपयेत् यत्नात् पूरयेत् क्षारकञ्चयम् ।
पुनरूर्द्ध्वं शरावेण लेपयेत्तत् दृढ़ं ततः ।
द्वात्रिंशद्यामपर्य्यन्तं वह्निज्वाला प्रदीयते ।
एवं सिद्धेन तालेन गन्धतुल्येन मेलयेत् ।
द्वयोस्तुल्यं जीर्णताम्रं वालुकायन्त्रगं पचेत् ।
अयं तालेश्वरो नाम रसः परमदुर्लभः ।
हन्त्यष्टादश कुष्ठानि वातशोणितनाशनः ।
रक्तमण्डलमत्युग्रं स्फुटितं गलितं तथा ।
वज्ररूपं सर्व्वजातं नाशयेदविकल्पतः ।
दुष्टव्रणञ्च वीसर्पं त्वग्दोषञ्च विनाशयेत् ।
दृष्टो वारसहस्रञ्च रोगवारणकेशरी" ।
इति महातालकेश्वरः । ७५ ।
"कुष्माण्डत्रिफलातैलकन्याकाञ्जिकभावितम् ।
तालकं तुल्यगन्धं स्यादर्द्धपारदमर्द्दितम् ।
अजाक्षीरेण निम्बूककन्यातोयैर्द्दिनत्रयम् ।
प्रत्येकं भावयेच्छुष्कं चक्रिकाकारतां गतम् ।
विपचेत् हण्डिकामध्ये पलाशक्षारमध्यगम् ।
यामान् द्वादश शीतेऽस्मिन् प्रयोज्यं रक्तिकाद्वयम् ।
हन्त्यष्टादश कुष्ठानि रोमविध्वंसनादिकम्" ।
इति तालकेश्वरः । ७६ ।
इति गोविन्दविशारदकृतभैषज्यरत्नावल्यां कुष्ठ-
चिकित्सा समाप्ता ।

कुष्ठकेतुः, पुं, (कुष्ठस्य नाशकः केतुरिव ।) भूम्याडल्यः ।
इति राजनिर्घण्टः ।

कुष्ठगन्धि, क्ली, (कुष्ठस्येव गन्धोऽस्य । समासे इच् ।)
एलवालुकम् । इति राजनिर्घण्टः ।

कुष्ठघ्नः, पुं, (कुष्ठं हन्ति इति । हन् + टक् ।) हिता-
वली । इति राजनिर्घण्टः ।

कुष्ठघ्नी, स्त्री, (कुष्ठघ्न + स्त्रियां टित्वात् ङीप् ।) काको-
दुम्बरिका । इति राजनिर्घण्टः ।
(वाकुची । अस्याः पर्य्याया यथा ।
"अवल्गुजो वाकुची स्यात् सोमराजी सुपर्णिका ।
शशिलेखा कृष्णफला सोमापूति फलीति च ।
सोमवल्ली कालमेषी कुष्ठघ्नी च प्रकीर्त्तिता" ।
इति भावप्रकाशस्य पूर्ब्बखण्डे प्रथमे भागे ।
अस्या व्यवहारो यथा—
"कुटजाग्निनिम्बकृतपत्रखदिरासनसप्तपर्णनिर्यूहे ।
सिद्धा मधु-घृतयुक्ताः कुष्ठघ्नीर्भक्षयेदभयाः" ।
इति वाभटे चिकित्सास्थाने १९ अध्याये ।)

कुष्ठनाशनः, पुं, (कुष्ठं नाशयतीति । नश् + णिच् +
ल्युः ।) वाराहीकन्दः । गौरसर्षपः । इति राज-
निर्घण्टः । क्षीरीशहृक्षः । इति रत्नमाला ।

कुष्ठनाशिनी, स्त्री, (कुष्ठं नाशयतीति । नश + णिच्
णिनिः । स्त्रियां नान्तत्वात् ङीप् ।) सोमराजिः ।
इति रत्नमाला ।

कुष्ठलं, क्ली, (कु कुत्सितं स्थलम् । कम्बलादित्वात्
सलम् ।) कुत्सितस्थलम् । इति संक्षिप्तसारव्या-
करणम् ।

कुष्ठसूदनः, पुं, (कुष्ठं सूदयति नाशयतीति । सूदि +
ल्युः ।) आरग्वधः । इति राजनिर्घण्टः ।
(आरग्वधशब्दे गुणपर्य्याया अस्य ज्ञातव्याः ।)

कुष्ठहन्ता, [ृ] पुं, (कुष्ठं हन्ति इति । कुष्ठ + हन्
+ तृच् ।) हस्तिकन्दः । इति राजनिर्घण्टः ।

कुष्ठहन्त्री, स्त्री, (कुष्ठहन्तृ + स्त्रियां ऋदन्तात्
ङीप् ।) वाकुची । इति राजनिर्घण्टः । हाकुच्
इति भाषा ।

कुष्ठहृत्, पुं, (कुष्ठं हरतीति । कुष्ठ + हृ + क्विप्
तुगागमश्च ।) खदिरवृक्षः । इति त्रिकाण्डशेषः ।

कुष्ठारिः, पुं, (कुष्ठस्य अरिः शत्रुः नाशक इत्यर्थः ।)